# अभिनवान्यथाख्यातिवादः

**Prof. Shrinivasa Varakhedi**

**Vice Chancellor,**

**Central Sanskrit University**

भ्रमप्रक्रियानिरूपणार्थं प्रवृत्तेषु अनेकविधेषु ख्यातिवादेषु मध्ये श्रीमन्मध्वाचार्याणामभिमत: यः अभिनवान्यथाख्पतिवाद: सः अत्र विव्रियते।

**तत्स्वरूपम्**

"इदं रजतमि"त्याकारकभ्रमे भासमानं रजतम् असदेव | आरोप्यस्य असत्वेऽपि अधिष्ठानम् इदं पदार्थः सदेव। इत्थं सद्रूपम् अधिष्ठानम्, अधिष्ठानगतसत्वारोपेण असद्रजतं अन्यथा भासते इति स्वीकारात् अयमपि अन्ययाख्यातिवाद एव । अथापि न्यायमतात् विलक्षण अयं अन्यथाख्यतिवाद इत्यतः अभिनवान्यथाख्याति इति व्यवह्रियते ।

**भ्रमसामग्री**

अधिष्ठानसामान्यज्ञानं , दुष्टकरणसम्प्रयोगः , पूर्वानुभवजन्यसंस्कार इत्यादि भ्रमसामग्री मतान्तरे इव अत्रापि बोध्या ।

**मतान्तरवैलक्षण्यम्**

न्यायमते अन्यत्र विद्यमानं सदेव रजतं पुरतो भासते , रामानुजमते शुक्तावेव सूक्ष्मरूपेण विद्यमानं सदेव रजतं भासते । विज्ञानवादिमते विज्ञानरूपेण सद्भूतमेव रजतं पुरतो भासते । प्राभाकरमते स्मर्यमाणं सदेव रजतं इदमनुभवात् न विविच्यते । अदेवैतमते सदसद्विलक्षणमेव रजतं तत्कालोत्पन्नं पुरतो भासते । माध्वमते तु असदेव रजतं पुरतो भासते इत्यतः सर्वतो वैलक्षण्यं यद्यपि माध्यमिकबौद्धमतेऽपि असदेव रजतं भासते अथापि तन्मते अधिष्ठानमप्यसदेव ; अत्र तु अधिष्ठानस्य सत्वाङ्गीकारात् ततोऽपि वैलक्षण्यं बोध्यम् ।

**आरोप्यस्य असत्वे प्रमाणम्**

- "असदेव रजतमभात्" इति बाधकालीनः प्रत्यक्षानुभवः।
- विमतं आरोप्यरजतं असदेव सत्वानधिकरणत्वात् नरश्रृङ्गवद् इत्यनुमानात्।
- असदेवेदमग्र आसीत् इति शून्यवादिभ्रान्त्यनुवादिका श्रुतिः।

**मतान्तरे दोषः**

- न्यायमते अन्यत्र अविद्यमानस्य रजतस्य पुरतः प्रत्यक्षप्रतीतिनिर्वाहाय ज्ञानलक्षणाप्रत्यासत्याद्यङ्गीकारेण गौरवम्।

- अद्वैतमते अलोकप्रसिद्धस्य सदसद्विलक्षणस्य रजतस्य उत्पत्तिविनाशाद्यङ्गीकारेण गौरवम्।
- रामानुजमते च शुक्त्यन्तर्गतरजतसामग्र्यादिकल्पने गौरवम् ।
- प्राभाकरमते स्मृत्यनुभवयोर्विवेकाभावमात्रेण रजतार्थिनः पुरोवर्तिनि प्रवृत्त्युपपादनायोगः ।
- विज्ञानवादिमते अर्थस्य ज्ञानात्मकत्वमिति अप्रामाणिककल्पनम्।
- माध्यमिकमते सतः अधिष्ठानस्यापि असत्वमेवेति अप्रामाणिककल्पनम्।

**स्वमते परकीयाक्षेपाणां समाधानम्**

1. ननु असत् रजतं प्रतीयते इति मतमयुक्तम् । असच्चेत् न प्रतीयेत । यतः अप्रतीयमानत्वमेव असत्वम्। अत: यदि रजतं प्रतीयते तर्हि असद्विलक्षणमेव तदिति वक्तव्यम् इति चेन्न । अप्रतीयमानत्वम् असत्वमित्युक्ते असत्वस्य पारिभाषिकत्वं स्यात् । यतः सत्वं नाम अबाध्यत्वम् इति परैरपि स्वीकृतम् । तद्विपरीतमेव असत्वं स्वरसतः निर्वक्तव्यम् । तच्च बाध्यत्वरूपम् । तथा च ; बाध्यं चेत् न प्रतीयेत इत्येव परैरपि आपादनीयम् । तच्च न शक्यमापादयितुम् । तैरपि बाध्यस्य प्रतीयमानत्वस्वीकारात् पदार्थेषु सत्-असत् इति कोटिद्वयमेव । यत् न सत् तदसदेव।
2. ननु अप्रतीयमानत्वरुपमेव असत्वं शशश्रृङ्गादिषु दृष्टम् । अत: लक्ष्यानुसारेण लक्षणकल्पने न दोषः इति चेन्न । अप्रतीयमानत्वमसत्वमित्युक्ते " असच्चेत् न प्रतीयेत " इति वाक्यस्य नैरर्थक्यं स्यात् । अप्रतीयमानं चेत् न प्रतीयेत इति ततः अर्थप्रतीत्युपपत्तेः । नापि लक्ष्यानुसारेण इदं लक्षणकल्पनम् । शाशश्रृङ्गादावपि यदसत्वं तत् सर्वदेशकालवृत्यत्यन्ताभावप्रतियोगित्वरूपमेव कल्पनीयम् । न तु अप्रतीयमानत्वरूपम् । शशश्रृङ्गादेरप्रतीतौ प्रतियोगिज्ञानाभावेन तन्निषेधादिकं न स्यात्।
3. ननु असतः स्वयं प्रतीत्यसमर्थस्य प्रतीतये सामग्री न कल्पयितुं शक्यते इति चेन्न । दोषस्यैव असत्प्रतीतिं प्रति कारणत्वात् । सद्विलक्षणत्वं हि असत्वम् । अद्वैतमते सद्विलक्षणस्य रजतस्य दोषप्रयुक्ता उत्पत्तिः प्रतीतिश्च स्वीकर्तव्या इति गौरवम् । न्यायमते देशान्तरस्य रजतस्य ज्ञानलक्षणया पुरतो भानेऽपि रजतसंसर्गस्य दोषवशादेव भानं स्वीकर्तव्यम् । अस्माभिस्तु रजतस्यैव असतः दोषवशात् भानं स्वीक्रियते ; नाधिकं कल्पनम् ।
4. ननु एवम् असतः यथा कथञ्चित् दोषादिना परोक्षज्ञानसम्भवेऽपि अपरोक्षज्ञानं न सम्भवति । प्रत्यक्षं प्रति इन्द्रियसन्निकर्षस्य हेतुत्वात् , असता सह इन्द्रियसन्निकर्षायोगादिति चेन्न । प्रत्यक्षप्रमां प्रत्येव इन्द्रियसन्निकर्षस्य हेतुत्वम् । असद्रजतप्रत्यक्षं तु भ्रमः इत्यतः न सन्निकर्षापेक्षा । नैय्यायिकैरपि एकदेशिभिः ज्ञानलक्षणानङ्गीकर्तृभि: , मीमांसकैः तथा अद्वैतिभिश्च आरोप्यरजतेन सह इन्द्रियसन्निकर्षं विनैव प्रत्यक्षमुपपाद्यते । रजते चाक्षुषत्वानुभवश्च तदधिष्ठानस्य चक्षुरिन्द्रियसन्निकृष्टत्वात् सन्निकृष्टे तस्मिन् अधिष्ठाने रजतस्य तादात्म्येन प्रतीयमानत्वात् उपपाद्यते । उभयविधैः बौद्धैरपि तथैवोपपाद्यते इति स्थिते मन्मते अपि तथैवास्तु।

अतः अद्वैतमते यथा साक्षिभास्यं तथा मन्मते अपि । तन्मते साक्षी नेन्द्रियम् ।मन्मते तु साक्षी इन्द्रियमेवेत्यतः तत्सन्निकर्षोप्यस्ति ।

5. ननु असतः शशश्रृङ्गस्यापि विनैवेन्द्रियसन्निकर्षं प्रत्यक्षत्वं कुतो न स्यात् इति चेत न । आरोप्यविषयकपूर्वानुभवजन्यसंस्कारस्यापि अन्यदार्शनिकैरिव अस्माभिरपि कारणत्वेनाङ्गीकारात्।
6. ननु एवमपि असत: ज्ञानविषयत्वं कथम् ? ज्ञानविषयत्वं हि ज्ञानेन सह असतो विषस्य सम्बन्धः। ज्ञानं सत्पदार्थः । विषयः असन् । तर्हि सदसतो: सम्बन्धाभावादेव असतः ज्ञानविषयत्वं दुर्निरूपमिति चेत ; न । न्यायमतेऽपि विषयतायाः विद्यमानाविद्यमानविषयसाधारण्यस्वीकारात्। तथाहि ; अतीतो घटः यदा स्मर्यते तदा स्मृतिविषयता घटे अस्ति न वा ? अस्तीत्यवश्यं वक्तव्यम् । परन्तु तदा घटो नास्ति । तद्वदेव अत्रापि असति विषये शुक्तिरजते सतो ज्ञानस्य विषयतासम्बन्धः अस्तु इति अस्माभिः समाधीयते । ननु स्मर्यमाणो घटः कदाचिदासीदेव, भ्रमविषयीभूतमसद्रजतं कदापि नासीत् इति वैलक्षण्यमस्ति इति चेन्न। एतस्य वैलक्षण्यस्य सत्वेऽपि अकिञ्चित्करं तत् । विषये अविद्यमानविद्यमानयोः विषयतारूपः सम्बन्धः भवतीति त्वङ्गीकृतमेव त्वयापि । मया तु सर्वदा अविद्यमाने अपि सः स्वीक्रियते इति इयानेव विशेषः ।
7. ननु एवमपि असति विशेषाभावात् शुक्तौ प्रतीयमानस्य असतः रजतत्वेन प्रतीतौ किं मानमिति चेत ; अत्र पृच्छामः । अद्वैतमते शुक्त्यवच्छिन्नचैतन्यनिष्ठायाः अविद्याया: परिणाम: अनिर्वचनीयरजतमिति स्वीक्रियते परन्तु तस्याः अविद्यायाः कोऽपि विशेषो नास्ति इत्यतः तत्परिणामभूतस्य अनिर्वचनीयपदार्थस्य रजतत्वे किं मानम् इति । एवं न्यायमतेऽपि अन्यत्र स्थितस्य पदार्थस्य पुरतो भाने वक्तव्ये अन्यत्र स्थितं रजतमेव भासते न घटादि इति कथं निश्चयः ? इति । तत्र उभाभ्यां वक्तव्यं शुक्तौरजतसादृश्यदर्शनेनोद्बोधितस्य रजतसंस्कारस्यापि भ्रमं प्रति हेतुत्वात् इति । तर्हि ममापि तदेवास्ति समाधानम् ।
8. ननु एवमपि संस्कारवशात् शुक्तौ असत: रजतस्यैव प्रतीतिरस्तु । असति पदार्थे सतो रजतत्वस्य विद्यमानता कथमिति चेत् ; न अनुभवानुरोधेन विषयातवत् धर्मिनिरपेक्षस्थितिकानां धर्माणामङ्गीकर्तव्यत्वात् । अन्यथा असति असत्वरूपोऽपि धर्मो न स्यात् । असत्वं यद्यसत् तर्हि असत: सत्वं स्यात् । ततो वरं धर्मिनिरपेक्षधर्मकल्पनम् । अतः मन्मते साक्षिरूपेण इन्द्रियेण सम्बन्धोऽपि असद्रजते इत्थमेव उपपादनीयः ।
9. ननु अद्‍वैतमते अनिर्वचनीयरजतस्य तात्कालिकत्वात् साक्षिणा सह सम्बन्धोऽपि तात्कालिक इत्यतः रजतस्य तात्कालिकं भानमुपपद्यते । त्वन्मते तु असद्रजतस्य तत्कालोत्पत्याद्यभावात् पूर्वमेव भानं स्यात् इति चेन्न । नहि असद्रजतस्य प्रत्यक्षप्रतीतौ साक्षिसम्बन्धमात्रं सामग्री । किन्तु अधिष्ठानसम्प्रयोग: , उद्बुद्धरजतसंस्कार इत्यादिकमपि । अतः तदभावात् तदभावः उपपद्यते।